CSU/Exam/SSS/2025/543

# केन्द्रीयसंस्कृतविश्वविद्यालयः

*(संसदः अधिनियमेन स्थापितः)*

**नई दिल्ली**

**परीक्षानुभागः**

**सूचना** १८ नवम्बर् २०२५

## सेतुबन्धाध्येतृवृत्तियोजना – लिखितपरीक्षानिर्देशाः

**विषयः – सेतुबन्ध-अध्येतृवृत्ति-योजनान्तर्गतस्य द्वितीयचरणस्य लिखितपरीक्षां २३ नवम्बर् २०२५ (रविवासरे) आयोज्यमानाम् अधिकृत्य अनन्तिमरूपेण चितानाम् अभ्यर्थीनां कृते निर्देशाः।**

F.No.17-2/Acd/CSU/Academic/2024/722 दिनाङ्कः 14.07.2025, F.No.172/Acd/CSU/Academic/2024/1213 दिनाङ्कः 10.10.2025, F.No.CSU/Exam/ SSS/2025/464 दिनाङ्कः 12.11.2025 चेत्यनुसारं सेतुबन्ध-अध्येतृवृत्ति-योजनान्तर्गतायाः चयनप्रक्रियायाः द्वितीयचरणस्य लिखितपरीक्षां 23.11.2025 दिनाङ्के (रविवासरे) आयोज्यमानाम् अधिकृत्य अनन्तिमरूपेण चितानाम् अभ्यर्थीनां कृते अधोलिखिताः निर्देशाः पालनीया इति संसूच्यते -

1. **परीक्षा-तिथिः**

| | |
|---|---|
| **२३ नवम्बर् २०२५ (रविवासरः)** | **प्रातः १०:०० वादनतः – अपराह्णे ०१:०० वादनं यावत्** |

2. **प्रवेशपत्रस्य डाउनलोडः**

   अभ्यर्थिनः स्वप्रवेशपत्रं सेतुबन्ध-पोर्टलतः (https://setubandha.sanskrit.ac.in/admit_card_sss01.php) १८ नवम्बर् २०२५ दिनाङ्कात् डाउनलोड् कर्तुं शक्नुवन्ति।

3. **यात्रावासस्य स्वव्ययः**

   अभ्यर्थिनः स्वव्ययेन लिखितपरीक्षायाम् उपस्थितव्याः। यात्रावासस्य व्ययः विश्वविद्यालयेन न प्रदीयते।

4. **यथासमयं केन्द्रे आगमनम्**

   परीक्षायाः आरम्भात् प्राक् न्यूनातिन्यूनं षष्ठि (६०) निमेषेभ्यः पूर्वं परीक्षाकेन्द्रे आगन्तव्यम्। परीक्षारम्भात् अर्धघण्टापूर्वं प्रवेशद्वारं रुद्धं भविष्यति। विलम्बेन आगतः अभ्यर्थी प्रवेशं न लप्स्यते।

5. **प्रवेशार्थम् आवश्यकप्रपत्राणि**

   प्रत्येकं अभ्यर्थी विश्वविद्यालयेन प्रदत्तं प्रवेशपत्रं, वैधं सर्वकारीय-छायाचित्रसहितं परिचयपत्रं च अनिवार्यतया दर्शयेत्। एताभ्यां विना प्रवेशः न भविष्यति।

**6. अभिभावकानां प्रवेशः निषिद्धः**

परीक्षाकेन्द्रे अभिभावकानां प्रवेशः निषिद्धः वर्तते। परीक्षाकेन्द्रे केवलं अभ्यर्थिनः एव प्रवेशं लप्स्यन्ते।

**7. प्रलेखानां समर्पणम्**

परीक्षायाम् अर्हतां प्राप्तुम् अनन्तिमरूपेण चिताः अभ्यर्थिनः (स्नातकोत्तरस्तरे विद्यावारिधिस्तरे च) सूचीस्थे 'टिप्पणी' स्तम्भे [F.No. 17-2/Acd/CSU/Academic/2024/1051 दिनाङ्कः 09.09.2025 तथा F.No. 17-2/Acd/CSU/Academic/2024/1310 दिनाङ्कः 11.11.2025] निर्दिष्टानि प्रलेखानि परीक्षारम्भात् एकघण्टायाः प्राक् समर्पयेयुः।

**8. प्रश्नपत्रस्य विवरणम्**

प्रत्येकं परीक्षार्थी स्वस्य प्रवेशपत्रे निर्दिष्टं विषयम् एव लिखितपरीक्षायां ग्रहीतुम् अर्हः।
परीक्षायाः प्रकारः – वर्णनात्मकः ।
अधिकतमाङ्काः – १००
उत्तीर्णाङ्काः – ५०

**9. परीक्षाकालः**

लिखितपरीक्षायाः कालावधिः – ३ घण्टाः

**10. परीक्षा-माध्यमम्**

सर्वाणि प्रश्नपत्राणि संस्कृतभाषायां वर्तन्ते। किन्तु 'कला', 'शारीरिकशिक्षा', 'आयुर्वेदः / भैषज्य-आरोग्यम्' इत्येतेषु विषयेषु प्रश्नाः हिन्दी-आङ्ग्ल-भाषाभ्यां अपि उपलभ्यन्ते। अभ्यर्थिनः केवलम् एकस्मिन् भाषायाम् उत्तरं लिखेयुः। यदि त्रिषु भाषासु भेदः दृश्यते तर्हि आङ्ग्लभाषा अन्तिमा मान्या भविष्यति।

**11. लेखनाय नीला कृष्णा वा बिन्दुलेखनी**

अभ्यर्थिनः केवलं नीलां कृष्णां वा बिन्दुलेखनीं प्रयोक्तुमर्हन्ति। स्वलेखनसामग्री (लेखनी, अङ्कनी, मार्जकः चेत्यादि) स्वयमेव आनेतव्या।

**12. अनावश्यकचिह्नानां द्रवाधारितपरिवर्तनस्य च निषेधः**

उत्तरपुस्तिकायाम् अनावश्यकचिह्नं, लेखनं, वृत्तं वा अन्यं किञ्चन न कर्तव्यम्। नाम, अनुक्रमाङ्कः, दूरवाणीसंख्या इत्यादीनि केवलं निर्दिष्टस्थले एव लिखेयुः। अन्यत्र लेखनम् अपशब्दप्रयोगो वा द्रवादि-अनुचितरीत्या उत्तरपरिवर्तनं निषिद्धम्। एतेन अभ्यर्थी अपात्रः भविष्यति।

**13. उत्तरपत्रस्य रक्षणम्**

उत्तरपुस्तिकां स्वच्छतया रक्ष्यताम्। तस्याः क्षतिः  न करणीया।

**14. इलेक्ट्रॉनिक् उपकरणानां स्ववस्तूनां च निषेधः**

मोबाइल्, स्मार्टवॉच्, गणकयन्त्रम्, अन्यत् डिजिटल् उपकरणं, पुटं, स्यूतः, मूल्यवत् वस्तु इत्यादीनां परीक्षाकक्षे निषेधः वर्तते। अभ्यर्थिभ्यः सूच्यते यत् एतानि वस्तूनि न आनेतव्यानि, केन्द्रे रक्षणाय व्यवस्था नास्ति।

**15. अनुचितरीतेः निषेधः**

परीक्षायाम् अनुचितरीतिः निषिद्धा वर्तते। अभ्यरर्थिनः केन्द्राध्यक्षेण/निरीक्षकैः/पर्यवेक्षकैः प्रदत्तनिर्देशाः अनिवार्यतया पालनीयाः। अन्यथा परीक्षायै अपात्रता तथा विश्वविद्यालयेन निर्दिष्टदण्डाय अर्हो भविष्यति।

**16. समयव्यवस्थापनम्**

समयः यथायोग्यं व्यवस्थापनीयः। अवधानेन लेखनीयम्। परीक्षावधेः अतिरिक्तसमयः न प्रदास्यते ।

**17. उत्तरपुस्तिकायाः समर्पणम्**

परीक्षायाः अन्ते उत्तरपुस्तिका निरीक्षकाय समर्पनीया। परीक्षानन्तरं प्रश्नपत्रं स्वयमेव गृहं नेतुं शक्यते।

**18. परीक्षाकेन्द्रात् निर्गमनम्**

परीक्षायाः सम्पूर्णप्रक्रियायाः पूर्णतायाः प्राक् परीक्षाकेन्द्रात् बहिर्निर्गन्तुं न शक्यते।

**19. उपर्युक्तनिर्देशानां पालनम् अनिवार्यमस्ति। एतेषां पालनाभावे अभ्यर्थी चयनप्रक्रियायाः बहिष्कृतो भविष्यति ।**

**कस्याश्चित् जिज्ञासायाः सत्त्वे सम्पर्कं क्रियताम् –**

011-28520976 (प्रातः १०:०० वादनतः – सायं ०६:०० वादनं यावत्)
setubandha@sanskrit.ac.in

**– ह –**

**परीक्षानियन्त्रकः**